केरळपाठावलिः

# संस्कृतम्

## नवमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

भागः 1 $\frac{1}{2}$

# KERALA READER SANSKRIT

STANDARD

9

For Academic and Sanskrit Schools

PART - 1 $\frac{1}{2}$

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2019

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च। अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च। मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax:0471-231869
Typesetting and Layout: SCERT
First Edition: 2019
Printed at : KBPS, Kakkanad, Kochi-30
Department of Education, Government of Kerala

# भूमिका

प्रिय छात्राः !

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखं विकासमेव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

अष्टमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां दृढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्तानि।

पाठसुस्तकस्यास्य प्रथमे भागे एककद्वयम् अस्ति। विषयानुसारमेव एककानां नामानि। प्रत्येकम् एककस्य प्रारम्भे आमुखम्, प्रवेशकप्रवर्तनं च दत्तमस्ति। पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्ताः। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्ताः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय। एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

राष्ट्रिय-कर्मनैपुणीपद्धतिं (NSQF) यदृच्छया समागच्छन्तीं दुर्घटनां निवारयितुं समर्थानि, जीवननैपुणीसंवर्धकानि प्रवर्तनानि तथा समग्रशिक्षा द्वारिकायाः कृते सूचना संवेदन तान्त्रिक- (ICT) साध्यताश्च परिगणय्य सम्पुष्टीकृतं वर्तते इदं पाठपुस्तकम्।

भाषापठनं सुगमं सरसं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं ललितं सफलं च भवतु इति आशासे।

**डा.जे.प्रसाद्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,केरळम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरळम्

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

## भागः 1

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| I वनमाला | १ | अमृतबिन्दवः। | (सुभाषितानि)। | ८ |
| | २ | प्रलोभनादुत्सर। | (कथा)। | १८ |
| | ३ | श्रियो मूलमनिर्वेदः। | (काव्यम्)। | २६ |
| II कौमुदी | ४ | देविश्री। | (यात्राविवरणम्)। | ४८ |
| | ५ | माकन्दमञ्जरी। | (गीतकम्)। | ५४ |

## पुस्तकसंरक्षणम्

‘तैलाद्रक्ष जलाद्रक्ष रक्ष मां श्लथबन्धनात्।
परहस्तगताद्रक्ष’- नित्यं रोदिति पुस्तकम्।।

## संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती।

## विद्यायाः महत्वम्

सर्वेषां शोभमानानां शोभनतमा विद्या।

एककम्
१

# वनमाला

## आमुखम्

विविधैः कुसुमैः ग्रथिता वनमाला इव विविधैः सुभाषितैः उपदेशसम्पुष्टं भवति संस्कृतसाहित्यम्। वनमालेति अस्मिन्नेकके **अमृतबिन्दवः** इति सुभाषितसञ्चयः **प्रलोभनादुत्सर** इति हितोपदेशकथा तथा रामायणात् समाकलितः **श्रियो मूलमनिर्वेदः** च इति त्रयः पाठाः आयोजिताः।



**प्रवेशकम्** - **सज्जनप्रशंसापराणि सुभाषितानि सञ्चिनुत।**

# पाठः १

# अमृतबिन्दवः



**आमुखम्**

संस्कृतभाषा संस्कृतिवाहिनी भवति। तस्याम् उपदेशपराणि, संस्कृतिद्योतकानि च बहूनि सुभाषितानि सन्ति। भारतीयसंस्कृतेः पालनपोषणप्रसारणेषु संस्कृतभाषायाः योगदानं महदेव। वसुधैव कुटुम्बकम् , मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इत्याद्याः सूक्तयः भारतीयसंस्कृतेः महिमानम् उद्घोषयन्ति। विक्रमचरितं, चाणक्यनीतिः, विक्रमाङ्कदेवचरितं, सुभाषितभण्डागारं, नीतिशतकम् इत्यादिभ्यः प्रशस्तसुभाषितग्रन्थेभ्यः च स्वीकृतानि कानिचन सुभाषितानि अत्र दत्तानि। तानि धर्माचरणाय अर्थसमाहरणाय, कर्तव्यपालनाय, सन्मार्गानुसरणाय च छात्रान् प्रेरयन्ति।

**प्रथमवयसि दत्तं तोयमल्पं स्मरन्तः**
**शिरसि निहितभाराः नारिकेला नराणाम् ।**
**सलिलममृतकल्पं दध्युराजीवनान्तं**
**न हि कृतमुपकारं साधवो विस्मरन्ति।।** १

(विक्रमचरितम्)

**पदच्छेदः**

| | | |
|---|---|---|
| साधवो विस्मरन्ति | - | साधवः + विस्मरन्ति। |
| नारिकेला नराणाम् | - | नारिकेलाः + नराणाम्। |
| दध्युराजीवनान्तम् | - | दध्युः + आजीवनान्तम्। |

**विग्रहः**

| | | |
|---|---|---|
| निहितभाराः | - | निहितः भारः यैः ते । |
| अमृतकल्पम् | - | अमृतेन तुल्यम् । |
| आजीवनान्तम् | - | जीवनान्तं यावत्। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| प्रथमवयसि दत्तम् | बाल्यकाले सिक्तं, पीतं वा । |
| अल्पं तोयं स्मरन्तः | जललेशमपि स्मरन्तः । |
| नारिकेलाः | नालिकेरवृक्षाः । |
| शिरसि निहितभाराः | मूर्धनि धृतफलाः । |
| नराणां(कृते) | मनुष्याणां (कृते) । |
| अमृतकल्पं सलिलम् | अमृततुल्यं जलम् । |
| आजीवनान्तम् | जीवितपर्यन्तम् । |
| दध्युः। | वहेयुः । |
| हि | यस्मात् करणात् |

| | |
|---|---|
| साधवः | सज्जनाः । |
| कृतमुपकारम् | कृतोपकृतिं |
| न विस्मरन्ति । | न अधीयन्ति / न अधियन्ति। |

**भावार्थः**

बाल्यकाले (रोपणसमये) सिक्तम् अल्पमात्रं जलं स्मरन्तः नारिकेलवृक्षाः मनुष्याणां कृते आजीवनम् अमृततुल्यं स्वादिष्टं जलं वहेयुः । सज्जनाः अन्यैः कृतम् उपकारम् आजीवनं न विस्मरन्ति इत्यर्थः ।

**कोशः**

तोयम् - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ।।

नरः - मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः विदुषा पूरुषा नरः ।।

नारिकेलः - नालिकेरस्तु लाङ्गली ।

साधुः - महाकुलकुलीनार्यः सभ्यसज्जनसाधवः ।

**क्रियापदानि**

दध्युः - डुधाञ् धारणपोषणयोः दाने च परस्मैपदी विधिलिङ् प्र. पु. ब. व।

विस्मरन्ति - वि + स्मृ चिन्तायां लट् परस्मैपदी प्र. पु. ब. व ।

**कुचेलिनं दन्तमलोपधारिणं**
**बह्वाशिनं निष्ठुरवाक्यभाषिणम्।**
**सूर्योदये चास्तमये च शायिनं**
**विमुञ्चति श्रीरपि चक्रपाणिनम् ।।** २ (चाणक्यनीतिः)

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| चास्तमये | - | च | + | अस्तमये। |
| श्रीरपि | - | श्रीः | + | अपि। |

**विग्रहः**

| | | |
|---|---|---|
| कुचेलिनम् | - | कुत्सितं चेलं यस्य सः कुचेली, तम् । |
| दन्तमलोपधारिणम् | - | दन्तेषु मलम् उपधरति इति दन्तमलोपधारी, तम् । |
| बह्वाशिनम् | - | बहु अश्नातुं शीलम् अस्य बह्वाशी, तम् । |
| निष्ठुरवाक्यभाषिणम् | - | निष्ठुरं वाक्यं भाषितुम् शीलम् अस्य इति निष्ठुरवाक्यभाषी, तम् । |
| शायिनम् | - | शेतुं शीलम् अस्य इति शायी, तम् । |
| चक्रपाणिनम् | - | चक्रं पाणौ यस्य सः चक्रपाणी, तम् । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| कुचेलिनम् | मलिनवस्त्रधारिणम् |
| दन्तमलोपधारिणम् | दन्तधावने विमुखम् |
| निष्ठुरवाक्यभाषिणम् | क्रूरसम्भाषणं कुर्वन्तम् |
| बह्वाशिनम् | अमितभक्षणशीलवन्तम् |
| सूर्योदये अस्तमये च | सूर्यस्य उदये अस्तमये च |
| शायिनम् | शयनशीलम् |
| चक्रपाणिनम् अपि | विष्णुम् अपि |
| श्रीः | लक्ष्मीदेवी |
| विमुञ्चति । | त्यजति । |

**भावार्थः**

मलिनवस्त्रधारिणं, दन्तशुद्धीकरणे विमुखम्, अमितभक्षणशीलवन्तं, क्रूरभाषणं कुर्वन्तं प्रभाते प्रदोषे च शयनं पुरुषोत्तमं, भगवन्तं विष्णुम् अपि लक्ष्मीदेवी परित्यजति इत्यर्थः ।

**कोशः**

चेलम् - वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम्।

दन्तः - रदना दशना दन्ता रदाः।

श्रीः - लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।
इन्दिरा लोकमाता मा रमा मङ्गलदेवता।
भार्गवी लोकजननी क्षीरसागरकन्यका ।।

चक्रपाणिः - उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।

## क्रियापदम्

विमुञ्चति - वि पूर्वक मुच्लृ मोक्षणे लट् परस्मैपदी प्र. पु. ए. व।

**उदयति यदि भानुः पश्चिमे दिग्विभागे**
**प्रचलति यदि मेरुः शीततां याति वह्निः ।**
**विकसति यदि पद्मं पर्वताग्रे शिलायां**
**न भवति पुनरुक्तं भाषितं सज्जनानाम् ।। ३**

(विक्रमाङ्कदेवचरितम्)

| अन्वयः | अन्वयार्थः |
| --- | --- |
| यदि भानुः | यदि सूर्यः । |
| पश्चिमे दिग्विभागे | प्रतीच्यां दिशि । |
| उदयति। | उदेति। |
| (यदि) मेरुः प्रचलति | यदि सुमेरुपर्वतः चलति (सञ्चरति)। |
| (यदि) वह्निः शीततां याति | यदि अग्निः शैत्यं प्राप्नोति । |
| (यदि)पद्मं पर्वताग्रे शिलायां विकसति | यदि नलिनं पर्वताग्रे शिलातले प्रफुल्लति। |
| तथापि सज्जनानां भाषितम् | तथापि महतां वचनम् । |
| पुनरुक्तं न भवति। | द्विरुक्तं न भवति (पुनः पुनः न वदति इति)। |

## भावार्थः

सूर्यः प्रतीच्याम् उदयति । अचलः सुमेरुः चलति। अग्निः शैत्यं प्राप्नोति। नलिनं पर्वताग्रे शिलातले प्रफुल्लति। एतत् सर्वम् असम्भाव्यं खलु? यद्यपि तत्सर्वं सम्भवति तथापि सज्जनानां वाक्यं द्विरुक्तं न भवति । सज्जनाः उक्तात् न व्यतिचलन्तीत्यर्थः।

## कोशः

भानुः - भानुर्हंससहस्रांशुः सविता तपनो रविः।

मेरुः - मेरुः सुमेरुः हेमाद्रिः रत्नसानुसुरालयः ।

वह्निः - अग्निर्वैश्वानरोवह्निर्वीतिहोत्रो धनञ्जयः ।

पद्मम् - वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।

शिला - पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।

## क्रियापदानि

उदयति - उद्पूर्वक अय गतौ लट् परस्मैपदी प्र. पु. ए. व।

प्रचलति - प्र पूर्वक चल गतौ लट् परस्मैपदी प्र. पु. ए. व।

विकसति - वि + कस् गतौ लट् परस्मैपदी प्र. पु. ए. व।

**तृणानि नोन्मूलयति प्रभञ्जनो**
**मृदूनि नीचैः प्रणतानि सर्वतः ।**
**समुच्छ्रितानेव तरून् प्रबाधते**
**महान् महत्येव करोति विक्रमम् ।। ४**

(सुभाषितभण्डागारम्)

## पदच्छेदः

नोन्मूलयति - न + उन्मूलयति।

प्रभञ्जनो मृदूनि - प्रभञ्जनः + मृदूनि।

महत्येव - महति + एव ।

## विग्रहः

प्रभञ्जनः - प्रकर्षेण भञ्जयति वृक्षादीन् इति ।

| अन्वयः | अन्वयार्थः |
| --- | --- |
| प्रभञ्जनः | प्रचण्डो वायुः |
| सर्वतः नीचैः प्रणतानि | सर्वत्र अधस्तात् विनम्राणि |
| मृदूनि तृणानि | लघूनि तृणानि |
| नोन्मूलयति। | न नाशयति । |
| समुच्छ्रितान् | उन्नतान् |
| तरून् एव | वृक्षान् एव (बाधते ) |
| महान् महति एव | बलवान् बलयुक्ते एव |
| विक्रमं करोति । | शूरतां प्रकटयति । |

**भावार्थः**

प्रचण्डमारुतः सर्वत्र अधस्तात् विनम्राणि लघूनि तृणानि न नाशयति। सः उन्नतशीर्षान् वृक्षान् एव बाधते। कुत इति चेत् बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं करोति ।

**कोशः**

| | | |
| --- | --- | --- |
| प्रभञ्जनः | - | समीरमारुतमरुत् जगत्प्राणसमीरणाः ।<br>नभस्वद्वातपवनपवमानप्रभञ्जनाः ।। |
| तरुः | - | वृक्षो महीरुहः शाखी विटपी पादपस्तरुः। |
| विक्रमम् | - | शक्तिः पराक्रमप्राणौ विक्रमस्त्वतिशक्तिता । |

**क्रियापदानि**

| | | |
| --- | --- | --- |
| प्रबाधते | - | प्र पूर्वक बाधृ लोडने लट् आत्मनेपदी प्र. पु. ए. व। |
| उन्मूलयति | - | उद् + मूल प्रतिष्ठायां लट्. परस्मैपदी प्र. पु. ए. व। |

**शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो**
**नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।**
**व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं**
**सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।। ५**

(नीतिशतकम्)

**पदच्छेदः**

| | | |
|---|---|---|
| शक्यो वारयितुम् | - | शक्यः + वारयितुम्। |
| व्याधिर्भेषजसंग्रहैश्च | - | व्याधिः + भेषजसङ्ग्रहैः + च। |
| विविधैर्मन्त्रप्रयोगैर्विषं | - | विविधैः + मन्त्रप्रयोगैः + विषम्। |
| सर्वस्यौषधमस्ति | - | सर्वस्य + औषधम् + अस्ति। |
| सूर्यातपो नागेन्द्रो निशिताङ्कुशेन | - | सूर्यातपः +नागेन्द्रः + निशिताङ्कुशेन। |
| समदो दण्डेन | - | समदः + दण्डेन। |
| नास्त्यौषधम् | - | न + अस्ति + औषधम्। |

**विग्रहः**

| | | |
|---|---|---|
| निशिताङ्कुशेन | - | निशितः च असौ अङ्कुशः च, तेन। |
| नागेन्द्रः | - | नागानां इन्द्रः/ नागेषु इन्द्रः। |
| हुतभुक् | - | हुतं भुङ्क्ते इति। |
| समदः | - | मदेन सह वर्तत इति। |
| गोगर्दभौ | - | गौश्च गर्दभश्च। |
| शास्त्रविहितं | - | शास्त्रेषु विहितम्। |
| मन्त्रप्रयोगैः | - | मन्त्र्यते मन्त्रयते गुप्तं भाषते इति मन्त्रः, तेषां प्रयोगैः। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| हुतभुक् | अग्निः |
| जलेन | वारिणा |
| सूर्यातपः | सूर्यप्रकाशः |
| छत्रेण | आतपत्रेण |
| समदः | मदयुक्तः |
| नागेन्द्रः | गजेन्द्रः |
| निशिताङ्कुशेन | तीक्ष्णेन अङ्कुशेन |

| | |
|---|---|
| गोगर्दभौ | धेनुः रासभः च |
| दण्डेन | यष्ट्या |
| व्याधिः | रोगः |
| विविधैः भेषजसंग्रहैः | बहुविधैः औषधैः |
| विषम् | गरलम् |
| मन्त्रप्रयोगैः | वैद्यैः सह गुप्तपरिभाषणैः |
| वारयितुं शक्यः। | निरोद्धुं योग्यः। |
| सर्वस्य शास्त्रविहितम् | सर्वकार्यस्य शास्त्रनिर्दिष्टम् |
| औषधम् अस्ति। | भेषजं वर्तते। |
| मूर्खस्य | क्षुद्रस्य/खलस्य/मूढस्य |
| औषधं नास्ति । | दोषनिवारणोपायः न वर्तते। |

**भावार्थः**

लोके अग्निः जलेन, सूर्यप्रकाशः आतपत्रेण, मदगजः अङ्कुशेन, गोगर्दभौ यष्ट्या, आमयः औषधैः, विषं मनोधैर्यवर्धकप्रयोगैः गुप्तपरिभाषणैः औषधैः च दूरीकर्तुं शक्यते । एवं सर्वस्यापि दोषस्य शास्त्रनिर्दिष्टाः प्रतिविधयः सन्ति । किन्तु मूर्खस्य दोषनिवारणाय यत्र कुत्रापि औषधं नास्ति एव।

**कोशः**

| | | |
|---|---|---|
| आतपः | - | प्रकाशो द्योत आतपः। |
| हुतभुक् | - | हिरण्यरेता हुतभुक् गहनो हव्यवाहनः। |
| छत्रम् | - | छत्रं त्वातपत्रम् । |
| नागः | - | मतङ्गजो गजो नागकुञ्जरो वारणः करी। |
| गर्दभः | - | रासभा गर्दभाः खराः। |
| व्याधिः | - | रुक्रुजोपतापरोगव्याधिगदामयाः । |
| भेषजः | - | भेषजौषधभैषज्यान्यगदो जायुरित्यपि। |

मूर्खः - अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

कदर्ये कृपणः क्षुद्रकिंपचानमितंपचाः ।

## पठनप्रवर्तनानि।

**सुभाषितानि एकैकशः सङ्घशः च विविधया रीत्या आलपतु।**

श्रद्धेयाः अंशाः

पदच्छेदः।

पदार्थज्ञानम् ।

अक्षरस्फुटता ।

उचिततालः।

**पठितानां श्लोकानां गद्यक्रमं लिखतु।**

श्रद्धेयाः अंशाः

अन्वयक्रमः ।

आशयक्रमीकरणम् ।

संग्रहः।

**निर्दिष्टाशययुक्तं श्लोकं पाठभागात् निर्धार्य लिखतु।**

अ ) सज्जनाः कृतमुपकारं कदापि न विस्मरन्ति।

आ) सज्जनानां कथितं द्विरुक्तं न भवति।

इ ) बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं प्रकटयति।

ई) मूर्खस्य दोषनिवारणाय औषधं नास्ति।

श्रद्धेयाः अंशाः

आशयावगमनः।

श्लोकनिर्धारणम्।

लेखनम् ।

**पठितानां श्लोकानाम् आशययुक्तानि अन्यानि सुभाषितानि समाहृत्य सम्पुटम् सज्जीकरोतु। कक्ष्यायाम् अवतारयतु ।**

श्रद्धेयाः अंशाः

आमुखम्।

आशयपूर्णता।

औचित्यम्।

**क्रियापदपरिचयः।**

डुधाञ् धारणपोषणयोः परस्मैपदि विधिलिङ्।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| **प्र. पु** | दध्यात् | दध्याताम् | दध्युः |
| **म.पु** | दध्याः | दध्यातम् | दध्यात |
| **उ.पु** | दध्याम् | दध्याव | दध्याम। |

अधि + इक् स्मरणे परस्मैपदि लट्।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| **प्र. पु** | अध्येति | अधीतः | अधियन्ति /अधीयन्ति । |
| **म.पु** | अध्येषि | अधीथः | अधीथ । |
| **उ.पु** | अध्येमि | अधीवः | अधीमः । |

चाक्रिकारोहणप्रक्रिया - **बुद्धेः महत्त्वप्रतिपादकं किमपि सुभाषितं लिखित्वा अवतारयतु।**

# पाठः २

# प्रलोभनादुत्सर।

## आमुखम्

संस्कृतसाहित्ये अतिविपुलत्वेन राजमानं वाङ्मयं भवति कथासाहित्यम्। कथाः विनोददायिकाः, उपदेशात्मिकाः , मनोरञ्जिकाः च भवन्ति। सर्वेभ्यः जनेभ्यः आनन्दं प्रदातुं, तान् सन्मार्गे सञ्चारयितुम् च ईदृश्यः कथाः उपकुर्वन्ति। तादृश्यः अनेकाः कथाः बृहत्कथायां पञ्चतन्त्रे हितोपदेशे च सन्ति। तेषु ग्रन्थेषु प्रसिद्धः भवति नारायणपण्डितस्य हितोपदेशः। विष्णुशर्मणः पञ्चतन्त्रस्य प्रभावः हितोपदेशे द्रष्टुं शक्यते। क्रिस्तोः परं चतुर्दशशतके ग्रन्थोऽयं विरचितः इति गण्यते।

पाटलीपुत्रस्य राज्ञः सुदर्शनस्य पुत्राः विद्याविमुखाः, अनधिगतशास्त्राः च आसन्। अत एव ते असन्मार्गिणः आचारहीनाः च अभवन् । राज्ञः निर्देशानुसारं तान् नीतिशास्त्राभिज्ञान् कर्तुं नारायणपण्डितः हितोपदेशकथाः अशिक्षयत् । तासु कथासु पशु-पक्षिणः कथापात्राणि आसन् । ततः झषबककथा पाठभागत्वेन स्वीकृता।

**भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।**
**अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात्।।**

मालवदेशे पद्मगर्भनामधेयं सरः अस्ति। तत्रैको वृद्धो बकः सामर्थ्यहीनः उत्कण्ठाकुलमिवात्मानं स्थितः। स च केनचित्कुलीरेण दृष्टः पृष्टश्च - किमिति भवानाहारत्यागेन तिष्ठति ? बकेनोक्तम् - 'मत्स्याः मम जीवनहेतवः। ते कैवर्तैरागत्य व्यापादयितव्याः इति वार्ता नगरोपान्ते मया श्रुता । अतो वर्तमानाभावादेव अस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारेऽप्यनादरः कृतः'। तच्छ्रुत्वा मत्स्यैरालोचितम्- इह अस्मिन् समये तावदुपकारक एवायं लक्ष्यते। तदयमेव यथाकर्तव्यं पृच्छ्यताम्। तथा चोक्तम् -

**उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।**
**उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ।।**



मत्स्याः ऊचुः - 'भो बक! कोऽत्र रक्षणोपायः?' बको ब्रूते – 'रक्षणोपायोऽस्ति। जलाशयान्तराश्रयणम्। तत्राहमेकैकशो युष्मान्नयामि'। मत्स्या आहुः - 'एवमस्तु'। ततोऽसौ बकः तान् मत्स्यानेकैकशो नीत्वा खादति स्म। अनन्तरं कुलीरस्तमुवाच- 'भोः बक ! मामपि तत्र नय'। ततो बकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं स्कन्धमारोप्य नीतवान्। कुलीरः मत्स्यकण्टकाकीर्णं तत्स्थलमालोक्य अचिन्तयत् - हा! हतोऽस्मि मन्दभाग्यः। भवतु इदानीं समयोचितं व्यवहरिष्यामि इत्यालोच्य कुलीरस्तस्य ग्रीवां चिच्छेद। स बकः पञ्चत्वं गतः । यः बहुवारम् अन्यान् वञ्चयति सः एकस्मिन् दिने गृह्यते।

**विश्वासो नैव कर्तव्यो मधुरासु खलोक्तिषु।**
**स्मर मूषकमार्जारझषबककथास्तथा।।**



**पदच्छेदः**

| | | |
|---|---|---|
| उपकर्त्रारिणा | - | उपकर्त्रा + अरिणा । |
| पश्चान्मृतः | - | पश्चात् + मृतः । |
| तत्रैकः | - | तत्र + एकः । |
| बकेनोक्तम् | - | बकेन + उक्तम् । |
| कैवर्तैरागत्य | - | कैवर्तैः + आगत्य । |
| आहारेऽप्यनादरः | - | आहारे + अपि + अनादरः । |
| मत्स्यैरालोचितम् | - | मत्स्यैः + आलोचितम् । |
| तत्राहमेकैकशः | - | तत्र + अहम् + एकैकशः । |

ततोऽसौ - ततः + असौ ।
कुलीरस्तमुवाच - कुलीरः + तम् उवाच ।
बकोऽप्यपूर्वकुलीरमांसार्थी - बकः + अपि + अपूर्वकुलीरमांसार्थी।

**विग्रहः**

हितोपदेशः - हितानां उपदेशः इति हितोपदेशः।
कण्टकाकीर्णः - कण्टकैः आकीर्णः ।
जलाशयान्तरम् - अन्यः जलाशयः, तम् ।

**धातुपरिचयः**

पृच्छ्यताम् - प्रच्छि ज्ञीप्सायां कर्मणि आत्मनेपदी.लोट् प्र. पु. ए. व ।
ऊचुः - ब्रूञ् व्यक्तायां वाचि परस्मैपदी. लिट् प्र. पु. ब. व ।
ब्रूते - ब्रूञ् व्यक्तायां वाचि आत्मनेपदी. लट् प्र. पु. ए. व ।
चिच्छेद - छिदिर् द्वैतीभावे परस्मैपदी. लिट् प्र. पु. ए. व ।

**कोशः**

झषः - पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः। इत्यमरः ।

## संस्कृतकथासाहित्यम्

| ग्रन्थः | कर्ता |
|---|---|
| बृहत्कथा | गुणाढ्यः |
| बृहत्कथामञ्जरी | क्षेमेन्द्रः |
| कथासरित्सागरः | सोमदेवः |
| वेतालपञ्चविंशतिः | शिवदासपण्डितः |
| शुकसप्ततिः | चिन्तामणिः(श्वेताम्बरजैनः) |
| पञ्चतन्त्रम् | विष्णुशर्मा |
| हितोपदेशः | नारायणपण्डितः |
| जातकमाला | आर्यशूरः |

## पठनप्रवर्तनानि।

**कथाभागं भावानुसारम् अवतारयतु।**

श्रद्धेयाः अंशाः

आशयावगमः।

आशयव्यक्तता ।

शैली।

**कथायाः सारांशं संगृह्य लिखतु।**

श्रद्धेयाः अंशाः

आशयावगमः।

संग्रहसामर्थ्यम्।

आशयव्यक्तता।

**कथास्तम्भं क्रमीकरोतु।**

- खलोक्तिषु विश्वासो नैव कर्तव्यः।
- मालवदेशे पद्मगर्भनामधेयं सरः अस्ति।
- भो बक! कोऽत्र रक्षणोपायः।
- कुलीरः बकस्य ग्रीवां चिच्छेद।
- बकः अपूर्वकुलीरमांसार्थी तं कुलीरं स्कन्धमारोप्य नीतवान्।

**श्रद्धेयाः अंशाः**

आशयावगमः।

क्रमीकरणम् ।

कथास्तम्भपूर्तिः।

**कथां मातृभाषायाम् अनुवदतु।**

**श्रद्धेयाः अंशाः**

चर्चा ।

आशयक्रोडीकरणम्।

उचितया भाषया लेखनम्।

**बककुलीरयोः सम्भाषणं संभाव्य लिखतु ।**

**श्रद्धेयाः अंशाः**

आशयावगमनः। क्रमीकरणम्। संम्भाषणलेखनम्।

**कथां नाटकरूपेण परिवर्त्य अवतारयतु ।**

**श्रद्धेयाः अंशाः**

पात्रानुसारेण वर्गीकरणम्। सम्भाषणपरिशीलनम्।

नाटकावतारणम्।

**उदाहरणानुसारं वाक्यं परिवर्त्य लिखतु।**

**उदा** - बकः आहारत्यागेन **तिष्ठति**। बकः आहारत्यागेन **अतिष्ठत्।**

बालिका पुस्तकं **पठति।** ..........................................

गायकः मधुरं **गायति।** ..........................................

बालः गृहाद्बहिः **क्रीडति।** ..........................................

## अधिकविस्तरः

**भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।**
**अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात्।।**

**अन्वयः-** उत्तमाधममध्यमान् बहून् मत्स्यान् भक्षयित्वा पश्चात् अतिलोभात् बकः कर्कटकग्रहात् मृतः।

**आशयः** विविधान् मत्स्यान् भक्षयित्वा अतिमोहात् बकः कुलीरग्रहात् मृतः।

**उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।**
**उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ।।**

**अन्वयः** उपकर्त्रारिणा (सह) सन्धिः (कार्या) अपकारिणा मित्रेण (सह) सन्धिः न (कार्या)। हि एतयोः लक्ष्यं लक्षणं च उपकारापकारौ (भवतः)।

**आशयः** उपकारं कुर्वता शत्रुणा सह सन्धिः कार्या। अपकारिणा मित्रेण सह सन्धिः न कार्या। यतः एतयोः शत्रुमित्रयोः अपकार -उपकारौ लक्षणे भवतः। शत्रोः लक्षणम् अपकारः एवं मित्रस्य लक्षणम् उपकारश्च। अपकाररूपे लक्षणे लक्ष्यं शत्रुर्भवति। उपकाररूपे तु लक्ष्यं मित्रमेव।

**विश्वासो नैव कर्तव्यो मधुरासु खलोक्तिषु।**
**स्मर मूषकमार्जारझषबककथास्तथा।।**

**अन्वयः -** मधुरासु खलोक्तिषु विश्वासः नैव कर्तव्यः। तथा मूषकमार्जार झषबककथाः स्मर।

**आशयः-** खलानां (दुष्टानां) मधुरवचनेषु विश्वासः न करणीयः। मूषक-मार्जार- मत्स्यकथाः स्मरणीया एव।

**क्रियापदपरिचयः।**

प्रच्छि ज्ञीप्सायां लोट् परस्मैपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | पृच्छतु-पृच्छतात् | पृच्छताम् | पृच्छन्तु |
| म.पु | पृच्छ-पृच्छतात् | पृच्छतम् | पृच्छत |
| उ.पु | पृच्छानि | पृच्छाव | पृच्छाम । |

ब्रूञ् व्यक्तायां वाचि लिट् परस्मैपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | उवाच | ऊचतुः | ऊचुः |
| म.पु | उवचिथ-उवक्थ | ऊचथुः | ऊच |
| उ.पु | उवाच-उवच | ऊचिव | ऊचिम। |

ब्रूञ् व्यक्तायां वाचि लट् आत्मनेपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | ब्रूते | ब्रुवाते | ब्रुवते |
| म.पु | ब्रूषे | ब्रुवाथे | ब्रूध्वे |
| उ.पु | ब्रूवे | ब्रूवहे | ब्रूमहे। |

छिदिर् द्वैतीभावे लिट् परस्मैपदी ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र. पु | चिच्छेद | चिच्छिदतुः | चिच्छिदुः |
| म.पु | चिच्छेदिथ | चिच्छिदथुः | चिच्छिद |
| उ.पु | चिच्छेद | चिच्छिदिव | चिच्छिदिम। |

चाक्रिकारोहणप्रक्रिया –

**उपदेशात्मिकां काञ्चित् इतिहासकथां लिखित्वा अवतारयतु।**



# पाठः ३

# श्रियो मूलमनिर्वेदः

**आमुखम्**

आदिकविः वाल्मीकिः, आदिकाव्यं रामायणम् इति च सुविदितम् । रामायणमेव आदिकाव्यमिति विद्वत्सम्मतम् । काव्यमिदं सकलवागर्थमकुटमणिरिव भासते नित्यम् ।

रावणापहृतां सीतामन्विष्य लङ्कामुपगतः हनूमान् अन्तःपुरे जनपदे च ताम् अदृष्ट्वा प्रथमं निराशोऽभवत्। यदि हनुमान् विना सीतावृत्तान्तं प्रतिनिवर्तते तर्हि निन्दापात्रतामेति इति विचिन्तयति। तथा अनिर्वेदकृतं कर्म एव फलमाप्नुयात् इति मत्वा वर्धितात्मवीर्यः सः सीतान्वेषणं पुनरारब्धुं निश्चिकाय। सुन्दरकाण्डात् सः सन्दर्भः पाठभागे स्वीकृतः।

१ स तस्य मध्ये भवनस्य मारुति-
र्लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ।।



**पदच्छेदः**

स तस्य - सः + तस्य ।

मारुतिर्लतागृहांश्चित्रगृहान्निशागृहान् - मारुतिः + लतागृहान् + चित्रगृहान् + निशागृहान् ।

चैव - च + एव।

**विग्रहः**

मारुतिः - मरुतः अपत्यं पुमान् ।

चारुदर्शनाम् - चारु दृश्यते या सा ताम्।

दर्शनोत्सुकः - दर्शने उत्सुकः ।

| अन्वयः | अन्वयार्थः |
|---|---|
| मारुतिः | हनुमान् |
| तस्य | रावणस्य |
| भवनस्य मध्ये | प्रासादस्य मध्ये |
| लतागृहान् | लतानिकुञ्जान् |
| चित्रगृहान् | विविधवर्णलिप्तान् निलयान् |
| निशागृहान् प्रति | रात्रिवसतीः लक्ष्यीकृत्य |
| जगाम। | ययौ। |
| सीतां | मैथिलीं |
| प्रतिदर्शनोत्सुकः | प्रत्यवलोकनतत्परः |
| सः | हनुमान् |
| चारुदर्शनां | मनोहररूपां(सुन्दरीं) |
| ताम् एव च | सीताम् एव च |
| न पश्यति । | न अवलोकयति । |

## भावार्थः

वायुपुत्रः हनुमान् रावणभवनानां मध्ये लतानिकुञ्जान् विचित्ररूपान् गृहान् तथा निशागृहान् च जगाम। सीतादर्शनव्यग्रः सः मनोहररूपां तामेव न अपश्यत् ।

## कोशः

गृहम् - 'गृहं गेहोऽथवसतिर्वेश्मसद्मनिकेतनम्' इत्यमरः।

## क्रियापदानि।

**'जगाम'- गम्लृ गतौ धातु लिट् परस्मैपदि ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र-पु | जगाम | जग्मतुः | जग्मुः |
| म-पु | जगमिथ- जगन्थ | जग्मथुः | जग्म |
| उ-पु | जगाम - जगम | जग्मिव | जग्मिम। |

२ स चिन्तयामास ततो महाकपिः
प्रियामपश्यन् रघुनन्दनस्य ताम्।
ध्रुवं हि सीता म्रियते यथा न मे
विचिन्वतो दर्शनमेति मैथिली।।

**पदच्छेदः**

| | | |
|---|---|---|
| स चिन्तयामास | - | सः + चिन्तयामास । |
| ततो महाकपिः | - | ततः + महाकपिः । |
| विचिन्वतो दर्शनमेति। | - | विचिन्वतः + दर्शनम् + एति । |

**विग्रहः**

| | | |
|---|---|---|
| महाकपिः | - | महान् चासौ कपिश्च। |
| रघुनन्दनस्य | - | रघूणां नन्दनः तस्य । |
| मैथिली | - | मिथिलायाः राजा मैथिलः, मैथिलस्य अपत्यं स्त्री। |

| अन्वयः | अन्वयार्थः |
|---|---|
| रघुनन्दनस्य | श्रीरामचन्द्रस्य |
| प्रियां तां | कान्तां तां (सीतां) |
| अपश्यन् | न पश्यन् (अदृष्ट्वा) |
| सः महाकपिः | स वानरवीरः |
| ततः | तदनन्तरम् |
| चिन्तयामास | (एवम्) अचिन्तयत् । |
| विचिन्वतः | अन्वेषणं कुर्वतः |
| मे दर्शनं | मम दृष्टिपथं |
| मैथिली | सीता |
| न एति । | न प्राप्नोति । |
| यथा | येन केनापि प्रकारेण |

| | |
|---|---|
| सीता | सीतादेवी (सा) |
| म्रियते | मरणं प्राप्नोति। |
| ध्रुवं हि (इति)। | इति (मया) सन्दिह्यते । |

**भावार्थः**

स वानरसत्तमः सीतां मार्गमाणः तामदृष्ट्वा रामभामिनी सा कदाचित् मृता भवेदिति (मृतिम् उपगम्यत इति) अचिन्तयत्।

**कोशः**

वानरः - ' कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ' ।

**धातुरूपाणि**

म्रियते - मृङ् प्राणत्यागे कर्तरि लटि प्र. पु. ए. व.।

अपश्यन् - नञ् पूर्वक दृशिर् धातोः शत्रन्तं प्र. ए. व ।

विचिन्वतः - वि पूर्वक चिनु धातोः शत्रन्तं षष्ठी ए. व ।

**३** **सा राक्षसानां प्रवरेण जानकी**
**स्वशीलसंरक्षणतत्परा सती।**
**अनेन नूनं प्रतिदुष्टकर्मणा**
**हता भवेदार्यपथे परे स्थिता।।**

**पदच्छेदः**

भवेदार्यपथे - भवेत् + आर्यपथे ।

**विग्रहः**

स्वशीलसंरक्षणतत्परा - स्वस्य शीलं स्वशीलम्, तस्य संरक्षणं स्वशीलसंरक्षणम्, तस्मिन् तत्परा।

जानकी - जनकस्य अपत्यं स्त्री ।

प्रतिदुष्टकर्मणा - दुष्टं कर्म दुष्टकर्म दुष्टकर्मणि इति प्रतिदुष्टकर्म, तेन।

आर्यपथे - आर्याणां पन्था आर्यपथः, तस्मिन् ।

| अन्वयः | अन्वयार्थः |
|---|---|
| परे | महति |
| आर्यपथे | श्रेष्ठमार्गे |
| स्थिता | वर्तमाना |
| स्वशीलसंरक्षणतत्परा | स्वपतिव्रतात्वसंरक्षणोत्सुका |
| सती | पतिव्रता |
| सा जानकी | सीता |
| प्रतिदुष्टकर्मणा | हीनकर्मणा |
| अनेन | एतेन |
| राक्षसानां प्रवरेण | राक्षसराजेन(रावणेन) |
| नूनं | निश्चयं |
| हता | मारिता |
| भवेत् (इति चिन्तयामास) । | स्यात् (इति अचिन्तयत्) । |

**भावार्थः**

सन्मार्गे तिष्ठन्ती स्वपातिव्रत्यरक्षणोत्सुका सती सा सीता निष्ठुरप्रतिकारेच्छुना रावणेन नूनं विपन्ना भवेत् इति हनुमान् शशङ्के ।

**कोशः**

राक्षसः - 'राक्षसः कौणपः क्रव्यात् क्रव्यादोऽसृक्च आशरः' इत्यमरः।

### धातुरूपाणि

भवेत् - भू सत्तायाम् - परस्मैपदि विधिलिङ् प्र. पु. ए. व ।
भवेत् - भवेतां - भवेयुः।

### प्रयोगविशेषः

- सा राक्षसानां प्रवरेण हता। (कर्मणि)
  तां राक्षसानां प्रवरः हतवान् । (कर्तरि)
- नूनम् इत्यवधारणे।

४ **विरूपरूपा विकृता विवर्चसो**
**महानना दीर्घविरूपदर्शनाः।**
**समीक्ष्य सा राक्षसराजयोषितो**
**भयाद्विनष्टा जनकेश्वरात्मजा।।**

### पदच्छेदः

विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः – विरूपरूपाः + विकृताः + विवर्चसः + महाननाः + दीर्घविरूपदर्शनाः ।

राक्षसराजयोषितो भयाद्विनष्टा - राक्षसराजयोषितः + भयात् + विनष्टा ।

### विग्रहः

विरूपरूपाः - विगतं रूपं यस्मात् तत् विरूपं, विरूपं रूपं यासां ताः।

महाननाः - महान्ति आननानि यासां ताः ।

दीर्घविरूपदर्शनाः - दीर्घे विरूपे च दर्शने यासां ताः।

राक्षसराजयोषितः - राक्षसानां राजा राक्षसराजः, तस्य योषितः।

जनकेश्वरात्मजा - जनकेश्वरस्य आत्मजा ।

| अन्वयः | अन्वयार्थः |
|---|---|
| विरूपरूपाः | विरूपाः |
| विकृतः | विकलरूपाः |
| विवर्चसः | तेजोहीनाः |
| महाननाः | बृहन्मुखीः |
| दीर्घविरूपदर्शनाः | प्रांशुविकृतरूपिणीः |
| राक्षसराजयोषितः | रावणपरिचारिकाः |
| समीक्ष्य | अवलोक्य |
| जनकेश्वरात्मजा | जानकी |
| भयात् | भीत्या |
| विनष्टा(भवेत् इति चिन्तयामास)। | विपन्ना (इति अमन्यत) । |

**भावार्थः**

विरूपिणीः विकृताः लावण्यरहिताः (तेजोहीनाः) महाशिरस्काः(महावक्त्राः) दुर्दर्शनाः (दुर्निरीक्ष्याः) च दशाननपरिचारिकाः दृष्ट्वा जनकात्मजा सीता भीत्या मृता भवेत् इति हनुमान् चिन्तयामास ।

**कोशः**

आननम् - 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः।

५ **सीतामदृष्ट्वा ह्यनवाप्य पौरुषं**
**विहृत्य कालं सह वानरैश्चिरम्।**
**न मेऽस्ति सुग्रीवसमीपगा गतिः**
**सुतीक्ष्णदण्डो बलवांश्च वानरः।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| ह्यनवाप्य | - | हि | + | अनवाप्य । |
| वानरैश्चिरम् | - | वानरैः | + | चिरम्। |
| मेऽस्ति | - | मे | + | अस्ति। |
| सुतीक्ष्णदण्डो बलवांश्च | - | सुतीक्ष्णदण्डः | + | बलवान् + च। |

**विग्रहः**

| | | |
|---|---|---|
| अनवाप्य | - | न अवाप्य। |
| पौरुषम् | - | पुरुषस्य भावः। |
| बलवान् | - | बलम् अस्य अस्तीति । |
| सुग्रीवसमीपगा | - | सुग्रीवस्य समीपं गच्छति या सा । |
| सुतीक्ष्णदण्डः | - | सुतीक्ष्णः दण्डः यस्य सः। |

| अन्वयः | अन्वयार्थः |
|---|---|
| चिरं कालम् | बहुकालम् |
| वानरैः सह | कपिभिः समम् |
| विहृत्य | विहारं कृत्वा |
| सीतां | जानकीं |
| अदृष्ट्वा | न पश्यन् |
| पौरुषं | पुरुषोचितं तेजः |
| अनवाप्य | अप्राप्य |
| मे | मम(हनुमतः) |
| सुग्रीवसमीपगा गतिः | सुग्रीवसकाशप्राप्तिः |
| न | नैव |
| अस्ति | भवति । |
| हि | निश्चयेन (यतः) |

| | |
|---|---|
| वानरः | सुग्रीवः |
| सुतीक्ष्णदण्डः | तीक्ष्णदण्डप्रदः |
| बलवान् च । | बलशाली च । |

### भावार्थः

वानरैः साकं बहुकालं व्यतीत्य सीताम् अनवलोक्य न्यस्तकर्मणि फलम् अलब्ध्वा यदि प्रतिनिवर्तनं मे न शक्यम्। यतः सुग्रीवः कठिनदण्डः शक्तिशाली च भवति।

### कोशः

पौरुषम् - 'पुंभावे तत्क्रियायां च पौरुषम् ' इत्यमरः।

### व्याकरणविशेषः

"सहयुक्तेऽप्रधाने" इति सूत्रेण समं साकं सार्धं सह इत्यादीनां शब्दानां योगे तृतीया विभक्तिः स्यात् । **वानरैः** सह इत्यत्र सहशब्दयोगे **वानरैः** इति तृतीया ।

६ **दृष्टमन्तःपुरं सर्वं**
**दृष्टा रावणयोषितः।**
**न सीता दृश्यते साध्वी**
**वृथा जातो मम श्रमः।।**

### पदच्छेदः

दृष्टा रावणयोषितः - दृष्टाः + रावणयोषितः।

जातो मम - जातः + मम।

### विग्रहः

रावणयोषितः - रावणस्य योषितः।

| अन्वयः | अन्वयार्थः |
|---|---|
| अन्तःपुरम् | राजस्त्रीणां वासस्थानं /राजनारीगृहम् |
| सर्वम् | समस्तम्(सम्पूर्णं) |

| | |
|---|---|
| दृष्टम् | अवलोकितम् |
| रावणयोषितः | दशाननस्य वध्वः |
| दृष्टाः | अवलोकिताः |
| साध्वी | पतिव्रता |
| सीता | जानकी |
| न | नैव |
| दृश्यते । | अवलोक्यते । |
| मम | मम(हनुमतः) |
| श्रमः | प्रयत्नः |
| वृथा | व्यर्थः |
| जातः । | अभवत् । |

**भावार्थः**

लङ्कायां राजान्तःपुरं सर्वं तथा रावणस्त्रियः सर्वाः अपि मया दृष्टाः । किन्तु सुशीला मैथिली एव न दृष्टा इत्यतः मम प्रयत्नः विफलः संजातः।

**कोशः**

योषित् - 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः.।

**धातुरूपाणि**

दृश्यते - दृशिर् प्रेक्षणे धातोः कर्मणि लटि प्र.पु.ए.व। कर्तरि पश्यति।

७ **किं वा वक्ष्यति वृद्धश्च**
**जाम्बवानङ्गदश्च सः।**
**गतं पारं समुद्रस्य**
**वानराश्च समागताः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| वृद्धश्च | - | वृद्धः + च। |
| जाम्बवानङ्गदश्च | - | जाम्बवान् अङ्गदः + च। |
| वानराश्च | - | वानराः + च। |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| समुद्रस्य | सागरस्य |
| पारं | अपरं तीरं |
| गतं (मां) | प्रतिनिवृत्तं मां |
| समागताः | आगताः |
| वानराः च | कपयः(च) |
| सः अङ्गदः च | (मम सुहृद्) अङ्गदः च |
| वृद्धः | प्राज्ञः |
| जाम्बवान् च | जाम्बवान् च |
| किं वा | किम् वा |
| वक्ष्यति ? | कथयिष्यति ? (निन्दापूर्वम्) |

**भावार्थः**

सीतामदृष्ट्वा प्रतिगच्छन्तं मां समुद्रतीरे स्थिताः सर्वे वानराः अङ्गदः वृद्धो(परिणतप्रज्ञः)जाम्बवान् च संभूय वा किं वक्ष्यन्ति ? परिहासेन किं किं न कथयिष्यन्ति ? इति हनुमान् चिन्तयति।

**कोशः**

समुद्रः - समुद्रोऽब्धिरकूपारः पारावारस्सरित्पतिः ।

८ **अनिर्वेदः श्रियो मूल-**

**मनिर्वेदः परं सुखम्।**

**अनिर्वेदो हि सततं**

**सर्वार्थेषु प्रवर्तकः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| श्रियो मूलमनिर्वेदः | - | श्रियः + मूलम् अनिर्वेदः। |
| अनिर्वेदो हि | - | अनिर्वेदः + हि। |

**विग्रहः**

| | | |
|---|---|---|
| अनिर्वेदः | - | न निर्वेदः। |
| प्रवर्तकः | - | प्रवर्तयति इति। |
| सर्वार्थेषु | - | सर्वेषु अर्थेषु । |

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अनिर्वेदः | स्वावमानराहित्यम् (जागरूकता) |
| श्रियः | ऐश्वर्यस्य |
| मूलम् | निदानम् |
| अनिर्वेदः | जागरूकता |
| परं | सर्वोत्कृष्टम् |
| सुखम् | सुखम् |
| सततं | सर्वदा |
| सर्वार्थेषु | सर्वपुरुषार्थेषु |
| प्रवर्तकः | नियोजकः |
| अनिर्वेदः हि। | अविरामप्रयत्नः एव(भवति)। |

**भावार्थः**

निराशारहितः (निस्तन्द्रः/अक्षीणः) प्रयत्नः एव सम्पदां सुखस्य च कारणम्। तथा

सर्वार्थेषु प्रयोजकः (प्रवर्तकः) च भवति अविरामप्रयत्नः। अर्थात् सीतादर्शनपर्यन्तं यत्नः करणीयः इति हनूमान् चिन्तयति।

**कोशः**

सुखम् - स्यादानन्दथुरानन्द शर्मशातसुखानि च। (अमरकोशः)



९ करोति सफलं जन्तोः
कर्म यत्तत् करोति सः।
तस्मादनिर्वेदकृतं
यत्नं चेष्टेऽहमुत्तमम्।।

**पदच्छेदः**

यत्तत् - यत् + तत्।

चेष्टेऽहमुत्तमम् - चेष्टे + अहम् उत्तमम्।

**विग्रहः**

सफलम् - फलेन सह वर्तते यस्मिन् कर्मणि इति।

अनिर्वेदकृतम् - न निर्वेदः अनिर्वेदः , तेन कृतम्।

| अन्वयः | अन्वयार्थः |
|---|---|
| जन्तोः | प्राणिनः |
| कर्म | प्रयत्नः |
| यत् | यादृशम् |
| कर्म | प्रवर्तनम् |
| सफलं करोति। | फलपूर्णं कल्पयति। |
| सः | देही |
| तत् | तादृशं कर्म |
| करोति | आचरति |
| तस्मात् | तस्मात्कारणात् |
| अहम् | हनुमान् |
| अनिर्वेदकृतम् | अविरामपूर्वम् (सोत्साहम्) |
| उत्तमम् | महनीयम् |
| यत्नम् | कर्म |
| चेष्टे । | करोमि । |

### भावार्थः

येन कर्मणा जनैः साफल्यम् अवाप्यते तदेव कर्म ते आचरन्ति। अतः अहं (हनुमान्) निराशारहितं सोत्साहं प्रयत्नं कर्तुम् इच्छामि। (अर्थात् पुनरपि प्रत्याशापूर्वं सीतान्वेषणं करोमि इति)

### कोशः

जन्तुः - प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' इत्यमरः।

### धातुरूपाणि

चेष्टे - चेष्ट चेष्टायाम् आत्मनेपदी लट् उ. पु. ए. व ।

**रूपाणि -** चेष्टे - चेष्टावहे - चेष्टामहे । (प्र.पु. ए. व. चेष्टते)

**१० इति सञ्चिन्त्य ववृधे**
**विचेतुमुपचक्रमे।**
**भूयश्चापि विचेष्यामि**
**न यत्र विचयः कृतः ।।**

### पदच्छेदः

भूयश्चापि - भूयः + च + अपि।

| अन्वयः | अन्वयार्थः |
|---|---|
| यत्र | यस्मिन् भागे |
| विचयः | अन्वेषणम् |
| न कृतः (तत्र) | न अनुष्ठितः (तत्र) |
| विचेष्यामि | अन्विष्यामि |
| इति | इत्येवम् |
| सञ्चिन्त्य | विचिन्त्य |
| ववृधे। | प्रवृद्धः अभवत् ।(मनसा शरीरेण च वर्धितः इत्याशयः) |

| | |
|---|---|
| अपि च | तथैव |
| भूयः | पुनः पुनः (सम्यक्) |
| विचेतुम् | अन्वेष्टुम् |
| उपचक्रमे । | आरेभे। |

**भावार्थः**

पूर्वोक्तप्रकारेण सम्यक् विचार्य इतः पर्यन्तं यत्र यत्र न अन्वेषणं कृतं तत्र तत्र सविस्तरम् अन्वेष्यामि इति निश्चित्य स हनुमान् मनसा शरीरेण च वर्द्धितवीर्यः पुनः विचयनं कर्तुं समारेभे।

**कोशः**

भूयः - 'मुहुर्भूयः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः।

**धातुरूपाणि**

ववृधे - वृधु वृद्धौ धातोः लिट् आत्मनेपदि प्र. पु. ए. व।

विचेष्यामि - वि उपसर्ग चिङ् चयने धातोः लृट् परस्मैपदि उ. पु. ए. व।

उपचक्रमे - उपपूर्वक क्रमुधातोः 'प्रोपाभ्यां समर्थाभ्याम्' इति सूत्रेण आत्मनेपदित्वम् लिट् प्र. पु. ए. व।

## पठनप्रवर्तनानि।

**श्लोकान् सतालम् आलपतु ।**

**श्रद्धेयाः अंशाः**

उचितः तालः।

भावात्मकता।

शुद्धोच्चारणम्।

**श्लोकानाम् आशयं संगृह्य वदतु लिखतु ।**

**श्रद्धेयाः अंशाः**

आशयपूर्तिः।

भाषाशुद्धिः।

संक्षेपस्य औचित्यम्।

**जीवितविजयाय प्रेरणादायकानि सुभाषितानि सञ्चित्य लिखतु।**

**श्रद्धेयाः अंशाः**

विषयानुबन्धित्वम्।

आशयावगतिः।

वैविध्यम्।

**भवताम् इष्टतमं श्लोकं सञ्चित्य आस्वादनटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

उचितश्लोकस्वीकारः।

आशयपूर्णता।

भाषाप्रयोगः।

'जीवने यदा निराशा बाधते तदा अतिजीवनम् अनिवार्यमेव।' **विषयेऽस्मिन् पाठभागस्य प्रसक्तिमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः**

आशयपूर्णता।

भाषाप्रयोगः।

भागभागित्वम्।

## शब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलेयम् |
|---|---|---|---|---|
| अनधिगतशास्त्राः | अशिक्षितशास्त्राः | ശാസ്ത്രം പഠിക്കാത്തവർ | ಶಾಸ್ತ್ರ ಕಲಿಯದವನು | Who didn't studied sciences |

| | | | | |
|---|---|---|---|---|
| अनवाप्य | अप्राप्य | ലഭിക്കാതിരുന്നിട്ട് | ಸಿಗದೇ | Having not attained |
| अनिर्वेदः | अनालस्यम्। | ഉത്സാഹത്തോടുകൂടിയ ശ്രദ്ധ | ಆಲಸ್ಯವಿಲ್ಲದೆ | Vigilance |
| अभिज्ञान् | पण्डितान् | പണ്ഡിതന്മാരെ | ಪಂಡಿತರನ್ನು | Scholars |
| अमृतकल्पम् | अमृततुल्यम् | അമൃതതുല്യം | ಅಮೃತಸಮಾನವಾದ | Equal to nectar |
| अरिः | शत्रुः | ശത്രു | ಶತ್ರು | Enemy |
| असन्मार्गिणः | दुर्मार्गिणः | ദുഃസ്വഭാവമുള്ളവർ | ಕೆಟ್ಟಸ್ವಭಾವವಿರುವವರು | Ill-natured |
| आजीवनान्तम् | आमरणात् | ജീവിതാവസാനം വരെ | ಕೊನೆಯವರೆಗೆ | Till teath |
| आलोक्य | विलोक्य | കണ്ടിട്ട് | ನೋಡಿ | Having beheld |
| उक्तिः | वचनम् | വാക്ക് | ಮಾತು | saying |
| उत्कण्ठाकुलः | व्याकुलः | വിഷമിച്ച | ವ್ಯಾಕುಲನಾದ | Agitated |
| एकैकशः | एकैकम् | ഒരോരുത്തരെയായി | ಒಬ್ಬೊಬ್ಬರಾಗಿ | One by One |
| कुचेली | कुत्सित-वस्त्रधारी | ജീർണ്ണ വസ്ത്രധാരി | ಮಲಿನವಸ್ತ್ರಧ-ರಿಸಿದವನು | Wearing dairty cloths |
| कुलीरः | कर्कटः | ഞണ്ട് | ಏಡಿ | Crab |
| कैवर्तः | धीवरः | മുക്കുവൻ | ಬೆಸ್ತ | Fisher Man |
| खलः | दुष्टः | ദുഷ്ടൻ | ದುಷ್ಟ | Cruel |
| गर्दभः | रासभः | കഴുത | ಕತ್ತೆ | Donkey |
| ग्रीवा | गलः | കഴുത്ത് | ಗಂಟಲು | Neck |
| चक्रपाणिः | विष्णुः | വിഷ്ണു | ವಿಷ್ಣು | Vishnu |
| चिच्छेद | अकर्तयत् | മുറിച്ചു, | ಮುರಿದನು | Cut |
| चित्रगृहम् | चित्रैरलंकृतं भवनम्। | നിറങ്ങൾ കൊണ്ട് മോടിപിടിപ്പിച്ച വീട് | ಬಣ್ಣಹಚ್ಚಿದ | Residence ornated by diferance Clours |
| चेष्टे | कुर्वे | ചെയ്യുന്നു | ಮಾಡುವೆ | I do |
| जीवनहेतवः | जीवनाधाराः | ജീവൻ നിലനിർത്തുന്നവ | ಜೀವನಕಾಯುವವರು | Bearing life |
| झषः | मत्स्यः | മത്സ്യം | ಮೀನು | Fish |

| | | | | |
|---|---|---|---|---|
| तृणम् | शष्पम् | പുല്ല് | ಹುಲ್ಲು | Grass |
| नगरोपान्ते | नगरसमीपे | നഗരസമീപത്ത് | ನಗರದಸಮೀಪ | Near the city |
| नागेन्द्रः | गजश्रेष्ठः | ഗജശ്രേഷ്ഠൻ | ಆನೆ | A lofty elephant |
| निशागृहम् | रात्रिगृहम् | രാത്രിഗൃഹം | ರಾತ್ರಿಗೃಹ | Nite residence |
| निशिताङ्कुशः | तीक्ष्णः अङ्कुशः | മൂർച്ചയേറിയ തോട്ടി | ಅಙ್ಕುಶ | Severe Goad |
| निहितभाराः | धृतभाराः | ഭാരം വഹിച്ചവ | ಹೊರುವವರು | Bearing Weights |
| पञ्चत्वम् | मरणम् | മരണം | ಮರಣ | Death |
| पारम् | परतीरम् | മറുകര | ಆಚ್ಚೆತೀರ | The other bank |
| प्रणतम् | विनतम् | നന്നായിതലകുനിച്ച | ವಿನಮ್ರ | With bowed head |
| प्रभञ्जनः | महावातः | കൊടുങ്കാറ്റ് | ಬಿರುಗಾಳಿ | Storm |
| बकः | कह्वः | കൊക്ക് | ಕೊಕ್ಕರೆ | Crane |
| बह्वाशी | अमितभोजी | അമിതാഹാരി | 'ಚ್ಚುಆಹಾರಸೇವಿಸುವವನು | Eating much |
| भानुः | सूर्यः | സൂര്യൻ | ಸೂರ್ಯ | Sun |
| भेषजम् | औषधम् | മരുന്ന് | ಮದ್ದು | Remady/ |
| मत्स्यकण्टकः | मत्स्यास्थि | മുള്ള് | ಮುಳ್ಳು | Fish |
| महाकपिः | कपिश्रेष्ठः | വാനരവീരൻ | ವಾನರ | A lofty Monkey |
| महाननाः | विपुलवक्त्राः | വലിയമുഖമുള്ളവർ | ದೊಡ್ಡಮುಖವಿರುವವರು | Having wide Faces |
| मारुतिः | हनुमान् | ഹനുമാൻ | ಹನುಮಂತ | Hanuman |
| ववृधे | वृद्धिं प्राप | വളർന്നുവന്നു | ಬೆಳೆದನು | Flourished |
| वह्निः | अग्निः | അഗ്നി | ಅಗ್ನಿ | Fire |
| विक्रमः | पराक्रमः | പരാക്രമം | ಪರಾಕ್ರಮ | Valour |
| विचेतुं | अन्वेष्टुं | അന്വേഷിക്കുന്നതിന് | ಹುಡುಕಲು | To Search |
| विवर्चसः | तेजोहीनाः | തേജസ് നഷ്ടപ്പെട്ട | ತೇಜಸ್ಸಿಲ್ಲದವರು | Bereft of Glory |
| श्री | ऐश्वर्यं | ഐശ്വര്യം | ಐಶ್ವರ್ಯ | Wealth |
| सरः | तटाकः | തടാകം | ತಟಾಕ | Lake |
| साध्वी | पतिव्रता | പതിവ്രത | ಪತಿವ್ರತೆ | Virtous women |
| सुतीक्ष्णदण्डः | कर्कशदण्डदाता | കടുത്ത ശിക്ഷനൽകുന്നവർ | ದಂಡಿಸುವವರು | Giving Grave Punishment |

| | | | | |
|---|---|---|---|---|
| स्कन्धः | अंसः | ചുമൽ | ಹೆಗಲು | Shoulder |
| हुतभुक् | अग्निः | അഗ്നി | ಅಗ್ನಿ | Fire |

# किमधिगतम् ?

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम-संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

## अभ्यासपत्रिका - १

**१) यथौचितं योजयत।**

| | | |
|---|---|---|
| भेषजं | - | नागेन्द्रः। |
| कर्कटकः | - | सीता। |
| हितोपदेशः | - | कुलीरः। |
| मैथिली | - | नारायणपण्डितः। |
| निशिताङ्कुशः | - | औषधम्। |

**२) पद्यं पठित्वा उचिताशयं चित्वा लिखत।**

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम्।।

क) मूर्खजनस्य मूर्खतापनयनाय औषधं नास्ति।

ख) सज्जनाः कृतमुपकारं न कदापि विस्मरन्ति।

ग) शक्तियुक्तः शक्तियुक्तेन सह पराक्रमं करोति।

**३) श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत।**

सीतामदृष्ट्वा ह्यनवाप्य पौरुषं
विहत्य कालं सह वानरैश्चिरम्।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवांश्च वानरः।।

**क.** सुतीक्ष्णदण्डः कः?

**ख.** श्लोकात् **क्त्वान्त**मव्ययं चित्वा लिखत।

**ग.** **बलवांश्च** इति पदस्य पदच्छेदं लिखत।

**घ.** सीतामदृष्ट्वा हनुमतः कीदृशी गतिः नास्ति?

**ङ.** **पुरुषस्य भावः** -अस्य एकं पदं लिखत।

**४) मञ्जुषातः पदानि स्वीकृत्य सम्भाषणांशान् पूरयत।**

**( अस्माकं, मित्रेण, आपत्कालः, बकेन, किम्, रक्षणोपायः , उपकर्त्रा)**

| | | |
|---|---|---|
| मत्स्यराजः | - | अस्माकम् ———— समीपमागतः। |
| मत्स्याः | - | कथं ज्ञातं भवता? |
| मत्स्यराजः | - | अत्र उपस्थितेन ———— उक्तम्। |
| मत्स्याः | - | बकेन ———— उक्तम्? |
| मत्स्यराजः | - | धीवराः आगत्य अस्माकं बन्धनं करिष्यन्ति इति। |
| मत्स्याः | - | अस्माकं ——— कः? |
| मत्स्यराजः | - | बकमेव प्रार्थयामः। |
| मत्स्याः | - | स तु ——— शत्रुः खलु! |
| मत्स्यराजः | - | ——अरिणा सह सन्धिः कर्तुं शक्यते। |
| मत्स्याः | - | एवं वा? |
| मत्स्यराजः | - | आम्। अपकर्त्रा —— सह सन्धिः न कार्या। |
| मत्स्याः | - | एवञ्चेत् तमेव आश्रयामः। |

एककम्
२

# कौमुदी



## आमुखम्

कौमुदी कस्य वा आनन्ददायिनी न भवति?
तथैव मानसोल्लासप्रदायकौ द्वौ अनूदितकाव्यांशौ
कौमुदी नामकेऽस्मिन्नेकके समायोजितौ।

**प्रवेशकम्** - युष्माकं देशे विद्यमानाः कृषिरीतीः, कार्षिकधान्यानि च अधिकृत्य चर्चां कुरुत।

# पाठः ४

# देविश्रीः



**एस्.के पोट्टक्काट्**
(शङ्करन्कुट्टि पोट्टक्काट्)

**जननम्** - १९१३ मार्च १४,कोषिक्कोट्।
**पितरौ** - कुञ्ञिरामन् पोट्टक्काट्, कुट्टूली च।
**यात्राप्रदेशाः** - आफ्रिक्का,अमेरिक्का, यूरोप्, पूर्वेष्या, दक्षिणएष्या ।

**पुरस्काराः** - केरलसाहित्यअक्कादमी पुरस्कारः(१९६२)
केन्द्रसाहित्यअक्कादमी पुरस्कारः(१९७३)
ज्ञानपीठपुरस्कारः। (१९८०)

**कृतयः** - ओरु देशत्तिन्टे कथा, ओरु तेरुविन्टे कथा, विषकन्यका, कुरुमुलक् (कथाः)
पातिरासूर्यन्टे नाट्टिल्, काप्पिरिकलुटे नाट्टिल्,बालिद्वीप्, सिंहभूमिः, यूरोप्पिलूटे इत्यदयः सञ्चारसाहित्यानि च।

**देहान्तः** - १९८२ आगस्ट् ०६

## आमुखम्

सञ्चारसाहित्यं न केवलं मानसोल्लासाय अपि तु अदृष्टपूर्वासां संस्कृतीनाञ्च अवबोधाय उपकारकं भवति। तस्य प्राग्रूपं प्रायः रामायण-मेघदूत-रघुवंशादिषु संस्कृतवाङ्मयेष्वपि तत्र तत्र दृश्यते।

मलयालसञ्चारसाहित्ये एस् .के. पोट्टक्काट् महाशयः प्रातःस्मरणीय एव। एते महाशयाः कश्चिदैन्द्रजालिक इव स्वविवरणैः अस्मानपि देशदेशान्तराणि नीत्वा विचित्रविस्मयान् अनुभावयन्ति।

अस्य **बालिद्वीप्** नामकस्य ग्रन्थस्य **'अरिश्री'** अध्याये बालिदेशवासिनां तदानीन्तनं कृषिजीवनं चारुतया प्रतिपादितमस्ति। तस्यानूदितांश एवायं पाठभागः।

एकस्मिन् प्रभाते बालिदेशस्य गिरिप्रदेशेषु सञ्चरन् तत्र तत्र दृश्यमानेन कृषिसौन्दर्येण आश्चर्यभरितोऽहम्। ग्रामे एकत्र कृषकानां मेलनं मया दृष्टम्। तस्मिन् भागं गृहीतवान्। व्रीहिमधिकृत्य तैरुक्ता कथेयम्।

"भक्ष्यरूपेण केवलं इक्षुरेवासीत् पुरा। तदा महाविष्णुः स्वयमागत्य भूमातरं व्रीहीणामुत्पादनाय नियुयोज" इति। कृषेः समृद्धेः च देवता भवति '**देविश्री**'। सा मुख्यतया व्रीहेः तण्डुलस्य चाधिदेवतारूपेण आराध्यते। अन्नभूतं धान्यम् आराधयन्तो बालिदेशवासिन इव काचन जनता कुत्रापि न दृश्यते।



ते पर्वतसानुषु कला सुभगतया '**साव**' नामकान् केदारान् निर्माय जलेन पूरयति। केदाराश्च दूरालोकने सोपानपङ्क्तिः इव विचित्ररूपेण प्रतिभान्ति। एते चन्द्रिकाचर्चिताः सावगिरयः यामिनीषु मणिसौधानि इव नितरां राजन्ते।

पौरेभ्यः कृषिस्थलं जलञ्च यथावश्यं वितरीतुं कार्षिकसहकरणपद्धतिः व्यवस्थापिता। सा पद्धतिः ''**अदात्**' इति नामके सामाजिकनीतिशास्त्रे मुख्यांशतया प्रतिपादिता। यन्त्रसाहाय्यं विना कन्दराणि कुल्याश्च निर्माय जलसेचनमपि कृतमासीत्।

'**सुबाक्**' इति कर्षकसङ्घस्य नेतृत्वे जलसेचनं, सेतुनिर्माणं, कार्षिकोत्सवाः च आयुज्यन्ते। **क्लियाङ्** नामकमध्यक्षं , **पोञ्जर्यक्कन्** इति उपाध्यक्षञ्च जनायत्तमार्गेण चिन्वन्ति। विवादांश्च कार्षिकसमितेः दायित्वे परिहरन्ति।

केरलेषु प्रचाल्यमानाः कार्षिकसमितयः इव बालिदेशेष्वपि एताः समितयः कार्षिकसंस्कृतिं परिपोषयन्ति। व्रीहिलवनोत्सवाः धान्यदेवताराधनञ्च बहुभिरनुष्ठानैः केरलेष्विव तत्राप्याघुष्यन्ते।

**पदच्छेदः**

| | |
|---|---|
| आश्चर्यभरितोऽहम्। | आश्चर्यभरितः + अहम्। |
| तैरुक्ता | तैः + उक्ता । |
| कथेयम्। | कथा + इयम्। |
| इक्षुरेवासीत् | इक्षुः + एव + आसीत् । |
| केदाराश्च | केदाराः+ च । |
| जलञ्च | जलं + च । |
| कुल्याश्च | कुल्याः + च। |
| उपाध्यक्षञ्च | उपाध्यक्षं + च । |
| विवादांश्च | विवादान् + च। |
| बालिदेशेष्वपि | बालिदेशेषु +अपि। |
| बहुभिरनुष्ठानैः | बहुभिः +अनुष्ठानैः। |
| तत्राप्याघुष्यन्ते | तत्र + अपि + आघुष्यन्ते। |

**विग्रहः**

| | | |
|---|---|---|
| आश्चर्यभरितः | - | आश्चर्येण भरितः। |
| कृषिसौन्दर्येण | - | कृषेः सौन्दर्यं कृषिसौन्दर्यम्, तेन। |
| पर्वतसानुषु | - | पर्वतानां सानवः पर्वतसानवः, तेषु। |
| कलासुभगतया | - | कलया सुभगः कलासुभगः तस्य भावः कलासुभगता। तया। |
| व्रीहिलवनोत्सवाः | - | व्रीहेः लवनं व्रीहिलवनं तस्य उत्सवाः। |

## पठनप्रवर्तनानि ।

**बालिदेशवासिनां कृषिविज्ञानसम्बन्धिनां साङ्केतिकपदानां केरलीयानां साङ्केतिकपदानुसारं पाठभागात् चित्वा लिखत।**

| | |
|---|---|
| कृषिदेवता | - |
| गिरिकेदारः | - |
| कृषिविज्ञानशास्त्रम् | - |
| कर्षकसङ्घः | - |
| कर्षकसङ्घाध्यक्षः | - |
| उपाध्यक्षः | - |

**पाठभागं पठित्वा बालिद्वीपनिवासिनां केरलीयानां च कृषिरीतिमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखत।**

**श्रद्धेयाः अंशाः**

भागभागित्वम्।

आशयपूर्णता।

भाषाप्रयोगः।

**सूचनानुसारं पोट्टक्काट्महाशयस्य जीवनचरितं स्ववाक्यैः लिखत।**

| | | |
|---|---|---|
| जननम् | - | १९१३ मार्च १४,कोषिक्कोट्। |
| पितरौ | - | कुञ्ञिरामन् पोट्टक्काट्, कुट्टूली च। |
| पुरस्काराः | - | केरलसाहित्यअक्कादमी पुरस्कारः<br>ज्ञानपीठपुरस्कारः। |
| कृतयः | - | ओरु देशत्तिन्टे कथा, ओरु तेरुविन्टे कथा,<br>विषकन्यका, कुरुमुलक् इत्यादयः। |
| देहवियोगः | - | १९८२ आगस्ट् ०६ |

**स्वकृतयात्रामधिकृत्य यात्राविवरणं लिखत।**

**श्रद्धेयाः अंशाः**

वाक्यघटना ।

आशयपूर्णता।

भाषाप्रयोगः।

**उदाहरणानुसारं वाक्यानि योजयत।**

**उदा-** सञ्चारसाहित्यं मानसोल्लासाय भवति।

तत् संस्कृतीनाम् अवबोधनाय भवति।

सञ्चारसाहित्यं **न केवलं** मानसोल्लासाय **अपि तु** संस्कृतीनाम् अवबोधनाय भवति।

**क)** येशुदासः गायकः भवति। सः अभिनेता भवति।

**ख)** सुरेशः साहित्यकारः भवति। सः चित्रकारः भवति।

**ग)** गणितपठनं श्रमकरं भवति। तत् सुखकरं भवति।

**घ)** जलं पानाय उपयुज्यते। तत् स्नानाय उपयुज्यते।

**ङ)** लेखनम् अक्षरज्ञानाय भवति। तत् चिन्ताविकासाय भवति।

**प्रकृतिक्षोभेण कृषिनाशं संभवति। एतादृशात् प्रकृतिदुरन्तात् कृषिं संरक्षितुं प्रयोजनप्रदान् मार्गान् अधिकृत्य संगोष्ठीं प्रचालयतु।**

**श्रद्धेयाः अंशाः**

आशयपूर्णता।

भाषाप्रयोगः।

चर्चायां भागभागित्वम् ।

# पाठः ५

# माकन्दमञ्जरी

## आमुखम्

संस्कृतसाहित्यं विविधैः काव्यविभागैः सम्पन्नं भवति। तथा भाषान्तरेभ्यः अनूदिताभिः कृतिभिः अपि संस्कृतभाषा सुसम्पन्ना। ईदृशेन अनुवादेन भाषयोरुभयोः शैलीभेदः अवगन्तुं शक्यते सहृदयैः। कालिदासादीनां महाकवीनां कृतयः वर्षेभ्यः पूर्वमेव केरलकालिदासादिभिः कैरल्या अनूदिताः। तथैव कुमारनाशान्, उल्लूर् प्रभृतीनां महाकवीनाम् अन्येषाञ्च रचनाः गैर्वाण्या च अनूदिताः। इदानीमपि वृत्तानुवृत्तं, पदानुपदं, आशयानुसारं च संस्कृतभाषायाः इतरभाषासु तथा इतराभ्यः संस्कृतभाषायाञ्च भाषान्तरीकरणं प्रचलदस्ति।



श्रीमतः वैलोप्पिल्लि श्रीधरमेनोन् महाभागस्य **माम्पषम्** नामिका कविता कैरल्यां प्रथितास्ति। मातृवात्सल्यस्य अनुत्तमोदाहरणत्वेन प्रथितायाः केकानामभाषावृत्तनिबद्धायाः अस्याः कवितायाः स्वतन्त्राशयानुवाद एव **माकन्दमञ्जरी**। श्रीमता हरिप्रसाद् कटम्पूर् महाभागेन अनूदितायाः कवितायाः काश्चन पङ्क्तयः अत्र समाकलिताः।

**अङ्गणस्थितादाम्रात् प्रथमे फले च्युते**
**मातुरक्षिभ्यां क्षणादपतत्तप्तोदकम् ।। १**

**पदच्छेदः**

अङ्गणस्थितादाम्रात् - अङ्गणस्थितात् + आम्रात् ।
क्षणादपतत्तप्तोदकम् - क्षणात् + अपतत् + तप्तोदकम्।

**विग्रहः**

अङ्गणस्थितात् - अङ्गणे स्थितः अङ्गणस्थितः, तस्मात्।



| *अन्वयः* | | *अन्वयार्थः* |
|---|---|---|
| अङ्गणस्थितात् | - | चत्वरस्थितात् |
| आम्रात् | - | आम्रवृक्षात् |
| प्रथमे फले च्युते | - | आद्यफले पतिते |
| मातुः | - | अम्बायाः |
| अक्षिभ्याम् | - | नेत्राभ्याम् |
| क्षणात् | - | झटित्येव |
| तप्तोदकम् | - | तप्ताश्रु |
| अपतत् । | - | पतति स्म। |

**आशयः**

गृहाङ्गणस्थाद् आम्रवृक्षात् यदा प्रथमतया पक्वफलमपतत् तस्मिन्नेव काले मातुः नयनाभ्यां तप्ताश्रूणि अपतन् ।

**कोशः**

**अङ्गणम्** - अङ्गणं चत्वराजिरे।
**आम्रः** - आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः।

**पूर्वं चतुर्मासेभ्यो लिप्सया प्रतीक्षिते**
**बालमाकन्दे सुमप्रसवे प्रवर्तिते ।। २**
**वत्सलात्मजो मातुः कुतुकादेकं चूत-**
**स्तबकं धृत्वाह्लादादन्तिकं सम्प्राप्तवान् ।। ३**

**पदच्छेदः**

| | | |
|---|---|---|
| चतुर्मासेभ्यो लिप्सया | - | चतुर्मासेभ्यः + लिप्सया। |
| कुतुकादेकम् | - | कुतुकात् + एकम्। |
| धृत्वाह्लादादन्तिकम् | - | धृत्वा + आह्लादात् + अन्तिकम् । |

**विग्रहः**

| | | |
|---|---|---|
| बालमाकन्दे | - | बालश्च असौ माकन्दश्च, तस्मिन्। |
| सुमप्रसवे | - | सुमस्य प्रसवः, तस्मिन्। |
| लिप्सया | - | लब्धुम् इच्छा लिप्सा, तया। |

| ***अन्वयः*** | | ***अन्वयार्थः*** |
|---|---|---|
| चतुर्मासेभ्यः पूर्वम् | - | चतुर्भ्यः मासेभ्यः प्राक् |
| लिप्सया | - | लब्धुमिच्छया |
| प्रतीक्षिते | - | आकाङ्क्षापूर्वं निरीक्षिते, |
| बालमाकन्दे | - | आम्रवृक्षके,(अस्मात् आम्रमञ्जरीमवचिनोतुं शिशोरपि साध्यम् इति द्योतनाय बालः इति विशेषणम्) |
| सुमप्रसवे | - | कुसुमोद्गमे |
| प्रवर्तिते | - | प्रचलिते (सति) |
| मातुः | - | अम्बायाः |
| वत्सलात्मजः | - | प्रियपुत्रः |

| | | |
|---|---|---|
| कुतुकात् | - | कौतुकात् |
| एकं चूतस्तबकम् | - | एकां चूतमञ्जरीम् |
| धृत्वा | - | प्रभज्य (धारयन् इति यावत्) |
| आह्लादात् | - | सन्तोषात् |
| अन्तिकम् | - | (अम्बायाः) समीपम् |
| सम्प्राप्तवान् । | - | समागतवान्। |

### आशयः

चतुर्भ्यः मासेभ्यः पूर्वम् आम्रवृक्षे कुसुमोद्भवोऽभवत्। तदानीं मातुः प्रियपुत्रः बालोचितेन कौतुकेन तेभ्यश्चूताङ्कुरेभ्यः स्तबकमेकं प्रभज्य तस्याः समीपं सामोदमागतवान्।

**रुषया मातावदत् - प्रफुल्लं गुच्छं शिशो!**
**लीलया त्वया खल! भञ्जितं कष्टं कष्टम्।। ४**
**पतिते चूते क्षणात् स्वीकर्तुं योग्यो भवान्**
**मञ्जरीं लुनात्यहो! ताडनव्यथाभावात् ।। ५**



### पदच्छेदः

मातावदत् - माता + अवदत् ।
लुनात्यहो - लुनाति + अहो ।

### विग्रहवाक्यः

ताडनव्यथाभावात् - ताडनस्य व्यथा, तस्याः अभावः, तस्मात्।

| *अन्वयः* | | *अन्वयार्थः* |
|---|---|---|
| माता | - | अम्बा |
| रुषया | - | रोषेण |
| अवदत् | - | अकथयत् |

| | | |
|---|---|---|
| खल ! शिशो ! | - | हे दुर्विनीत बालक ! |
| प्रफुल्लं | - | विकसितम् |
| गुच्छम् | - | पुष्पस्तबकम् |
| त्वया लीलया | - | त्वया क्रीडया |
| भञ्जितम् | - | विनाशितम् (अवमर्दितम् इति यावत्) |
| कष्टं कष्टम् | - | एतत् खेदकरमेव। |
| चूते | - | आम्रफले |
| पतिते | - | गलिते (सति) |
| क्षणात् | - | तदैव |
| स्वीकर्तुं | - | समाहर्तुं, |
| योग्यः | - | भवान् समर्थः |
| ताडनव्यथाभावात् | - | दण्डनवेदनाभावात् |
| मञ्जरीम् | - | पुष्पस्तबकम् |
| लुनाति। | - | अवचिनोति।।५।। |

**आशयः**

तद्दृष्ट्वा माता रोषेणावदत् , हे दुर्विनीत ! विकसितां चूतमञ्जरीं त्वमवचिनोषि। एतद् कष्टमेव । त्वं ताडनव्यथां न जानासि। पक्वमाम्रफलं पतनावसरे एव स्वीकर्तुं योग्यः त्वमेव आम्रमञ्जरीम् अवचिनोषि।

**कोशः**

**मञ्जरी** - वल्लरिर्मञ्जरिस्त्रियाम्। स्याद् गुच्छकस्तु स्तबकः।

**मातुराक्षेपं श्रुत्वा पुत्रस्य मुखाम्भोजं**

**निष्कलं तप्ताश्रुभिर्वैवर्ण्यमाप्तं क्षणात्।। ६**

**पदच्छेदः**

तप्ताश्रुभिर्वैवर्ण्यम् - तप्ताश्रुभिः + वैवर्ण्यम्।

**विग्रहः**

मुखाम्भोजम् - मुखम् एव अम्भोजम्।

| ***अन्वयः*** | | ***अन्वयार्थः*** |
|---|---|---|
| मातुः | - | अम्बायाः |
| आक्षेपम् | - | निन्दाम् |
| श्रुत्वा | - | निशम्य |
| पुत्रस्य | - | आत्मजस्य |
| निष्कलं | - | कलङ्करहितम् |
| मुखाम्भोजम् | - | मुखकमलम् |
| तप्ताश्रुभिः | - | दुःखबाष्पैः |
| क्षणात् | - | सत्वरम् |
| वैवर्ण्यम् | - | विवर्णभावम् |
| आप्तम्। | - | प्राप्तम्। |

**आशयः -**

अम्बायाः रोषवचनं श्रुत्वा पुत्रस्य निर्मलं मुखं तत्क्षणमेव दुःखाश्रुभिः विवर्णतां प्रपेदे।।६।।

**कोशः**

आक्षेपः - अवर्णाक्षेपनिर्वादपरिवादापवादवत्।

**माकन्दं समाहर्तुं नागमिष्यामीत्युक्त्वा**
**स्तबकं पुत्रोऽक्षिपत् सुन्दरं भूमौ शुचा ।। ७**

**पदच्छेदः**

| | | |
|---|---|---|
| नागमिष्यामीत्युक्त्वा | - | न + आगमिष्यामि + इति + उक्त्वा। |
| पुत्रोऽक्षिपत् | - | पुत्रः + अक्षिपत्। |

| ***अन्वयः*** | | ***अन्वयार्थः*** |
|---|---|---|
| माकन्दम् | - | आम्रफलम् |
| समाहर्तुम् | - | स्वीकर्तुम् |
| न आगमिष्यामि | - | अहं न अभ्यागमिष्यामि, |
| इति उक्त्वा | - | इति उदीर्य |
| पुत्रः | - | तनयः |
| सुन्दरम् | - | मनोहरम् |
| स्तबकम् | - | कुसुममञ्जरीम् |
| शुचा | - | दुःखेन |
| भूमौ | - | भूतले |
| अक्षिपत् । | - | क्षिपति स्म। |

**आशयः-**

अहमाम्रफलं स्वीकर्तुं नागमिष्यामि इति दुःखेन उक्त्वा पुत्रः सुन्दरं तत्स्तबकं भूमौ अभ्यक्षिपत्।

**भाषणं यथायोग्यं कर्तुमज्ञाताः बालाः**
**दीर्घद्रष्टारो यूयं समर्थाः दैवज्ञास्ते।।८।।**

**पदच्छेदः**

| | | |
|---|---|---|
| दैवज्ञास्ते | - | दैवज्ञाः + ते। |
| दीर्घद्रष्टारो यूयं | - | दीर्घद्रष्टारः + यूयम् । |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| बालाः ! | - | हे बालकाः ! |
| यथायोग्यम् | - | योग्यतां अनुसृत्य |
| भाषणम् | - | सम्भाषणम् |
| कर्तुम् | - | प्रयोक्तुम् |
| अज्ञाताः | - | असमर्थाः |
| ते यूयं | - | तादृशाः यूयं |
| दीर्घद्रष्टारः | - | दीर्घदर्शिनः |
| समर्थाः | - | परिचयसम्पन्नाः |
| दैवज्ञाः । | - | ज्यौतिषिकाः (स्थ)। |

**आशयः**

हे बालाः ! सम्यक् रीत्या सम्भाषणं कर्तुमसमर्थाः भवन्तः, भाविं प्रवक्तुम् अतिसमर्थाः भवन्ति। (लीलया कृतं शिशूनां वचनमपि कदाचित् सम्यक् फलति इति कविहृदयः)

**ग्रीष्ममार्ताण्डांशुभिर्माकन्दे मरकतं**
**काञ्चनसौगन्धिकं समभूत्तस्मात्पूर्वम्।। ९**
**माकन्दं समाहर्तुं नोत्सुको भूत्वा मातु-**
**रर्भकः पुँस्कोकिलोऽप्यगच्छत्सुरलोकम् ।। १०**

**पदच्छेदः**

| | | |
|---|---|---|
| नोत्सुको भूत्वा | - | न + उत्सुकः + भूत्वा। |
| ग्रीष्ममार्ताण्डांशुभिर्माकन्दे | - | ग्रीष्ममार्ताण्डांशुभिः + माकन्दे । |
| समभूत्तस्मात्पूर्वम् | - | समभूत् + तस्मात् + पूर्वम्। |
| मातुरर्भकः | - | मातुः + अर्भकः। |
| पुँस्कोकिलोऽप्यगच्छत् | - | पुँस्कोकिलः + अपि + अगच्छत्। |

**विग्रहः**

| | | |
|---|---|---|
| ग्रीष्ममार्ताण्डांशुभिः | - | ग्रीष्मे मार्ताण्डः,तस्य अंशुः, तैः। |
| काञ्चनसौगन्धिकम् | - | काञ्चनं च तत् सौगन्धिकम् च। |
| पुँस्कोकिलः | - | पुमान् च असौ कोकिलः च। |

| ***अन्वयः*** | | ***अन्वयार्थः*** |
|---|---|---|
| ग्रीष्ममार्ताण्डांशुभिः | - | निदाघकालसूर्यकिरणैः |
| माकन्दे | - | आम्रवृक्षे |
| मरकतं | - | मरतकवर्णम्  आम्रफलम्, (यथा) |
| काञ्चनसौगन्धिकं | - | स्वर्णवर्णं तथा सुगन्धसमेतं च (फलम्) |
| समभूत् । | - | (परिणामम्)अवाप्नुयात्। |
| तस्मात् पूर्वम् | - | तस्मात् कालात् पूर्वम्। |
| मातुः | - | अम्बायाः |
| अर्भकः | - | शिशुः |
| पुँस्कोकिलः | - | पुमान् कोकिलः |
| माकन्दम् | - | आम्रफलम् |
| समाहर्तुम् | - | स्वीकर्तुम् |
| न उत्सुकः भूत्वा | - | अनिच्छन् |
| सुरलोकम् | - | स्वर्लोकम् (दिवम् इति यावत्) |
| अगच्छत्। | - | अगात्। |

### आशयः

अथ ग्रीष्मकालसूर्यकिरणैः प्रदीप्तं (परिपक्वम्) आम्रफलं मरतकवर्णं परित्यज्य स्वर्णवर्णं सुगन्धपूर्णञ्चाभवत्। किन्तु तस्मात् कालात् पूर्वं मातुः प्राणप्रियः पुत्रः, पुँस्कोकिलः इव आम्रफलं समाहर्तुम् अनिच्छन् दिवमगच्छत्।। (पुँस्कोकिलः चूतस्य सुमप्रसवसमय एव तस्मिन् तत्परो भवति, न तु चूतफलास्वादने। तदिव अयमर्भकोऽपि तस्मिन् विमुखोऽभूदित्याशयः)

**अमरप्रियोऽपि स ज्ञातिषु विमुखस्सन्**
**सन्ततं क्रीडालोलो विहरत्यस्मिन् काले ।। ११**

### पदच्छेदः

| | | |
|---|---|---|
| अमरप्रियोऽपि | - | अमरप्रियः + अपि । |
| विमुखस्सन् | - | विमुखः + सन्। |
| क्रीडालोलो विहरत्यस्मिन्- | | क्रीडालोलः + विहरति + अस्मिन् । |

### विग्रहः

| | | |
|---|---|---|
| अमरप्रियः | - | अमराणां प्रियः। |
| लोकान्तरम् | - | अन्यः लोकः । |

| *अन्वयः* | | *अन्वयार्थः* |
|---|---|---|
| अमरप्रियः अपि | - | देवानां वात्सल्यपात्रम् अपि (अपि इति सम्भावनार्थे) |
| सः | - | अयं बालकः |
| ज्ञातिषु | - | बन्धुजनेषु |
| विमुखः | - | पराङ्मुखः (उदासीन इति यावत्) |
| सन्ततं | - | निरन्तरं |
| क्रीडालोलः सन् | - | केलीतत्परः सन् |
| विहरति । | - | (यदा) क्रीडति। |
| अस्मिन् काले | - | एतत्काले |

**आशयः -**

दिवं गतः अयं बालकः देवानां प्रियङ्करो भूत्वा बान्धवेषु उदासीनस्सन् क्रीडातात्पर्येण अत्र व्यहरत् । तस्मिन्नेव काले गृहाङ्गणस्थाद् आम्रवृक्षात् प्रथमपतितं पक्वमाम्रफलं वीक्षितवत्याः मातुः नयनाभ्यां तप्ताश्रूणि अपतन्।

**कोशः**

**दैवज्ञः** - ज्यौतिषिको दैवज्ञगणकावपि।

## पठनप्रवर्तनानि।

**कवितां सतालम् आलपतु।**

**श्रद्धेयाः अंशाः**

उचितः तालः । भावात्मकता। उच्चारणशुद्धिः।

**पाठभागाद् इष्टतमाः पङ्क्तीः चित्वा आस्वादनटिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

इष्टस्य कारणम्। उचितभाषाप्रयोगः। आशयपूर्णता।

**अङ्गणस्थितादाम्रात् प्रथमे फले च्युते मातुरक्षिभ्यां तप्तोदकम् अपतत्। वाक्यमिदं यदा...तदा उपयुज्य परिवर्तयतु। समानप्रयोगान् चित्वा लिखतु।**

**श्रद्धेयाः अंशाः**

प्रयोगसादृश्यम्। उचितलकारप्रयोगः। आशयपूर्णता।

**कैरलीतः संस्कृतभाषया अनूदितानां कृतीनां तेषां कर्तॄणां च पट्टिकां करोतु।**

**श्रद्धेयाः अंशौ**

औचित्यम्।  कालक्रमः ।

**कवितायाः आशयं कथारूपेण परिवर्त्य लिखतु।**

**श्रद्धेयाः अंशाः**

उचितभाषाप्रयोगः।  आशयपूर्णता।  कथाघटना।

## विशेषः

अङ्गणस्थितादाम्रात् प्रथमे फले च्युते मातुरक्षिभ्यां तप्तोदकम् अपतत् इति वाक्ये प्रथमे फले च्युते इति पदत्रयं सप्तमीविभक्ति रूपं भवति। (यस्य च भावेन भावलक्षणम्- अष्टाध्यायी-२- ३- ३७)

आम्रम् - आम्रस्य फलम्। द्विहिनं प्रसवे सर्वम् इति नियमेन. क्लीबत्वम्। फले लुक् (४- ३- १६३) इति लुक्। एवं माकन्दम् ,चूतम् इत्यत्रापि द्रष्टव्यम्।

- **रुषया** - रुषा इत्याकारन्तशब्दस्य तृतीयैकवचनं रूपम्।
  ***क्रोधो भामः क्रुधा रुषा*** -इति शब्दार्णवः। भागुरिमतेन रुट् शब्दस्य टाप् योगेन आकारान्तत्वम्। तदुक्तम्-
  **वष्टि भागुरिरल्लोपं  अवाप्योरुपसर्गयोः।**
  **आपञ्चैव हलन्तानां यथा वाचा निशा दिशा।।** -इति। एवम्-
  निट् -**निशा** , रुट् -**रुषा**, दिक् -**दिशा**, वाक् -**वाचा** इति आकारान्तरूपमपि साधुः।।
- **आम्रम् -** आम्रस्य फलम्। **द्विहीनं प्रसवे सर्वम्** इति नियमेन क्लीबत्वम्।
  **फले लुक्** (4–3-163) इति लुक। एवं माकन्दम्, चूतम् इत्यत्रापि द्रष्टव्यम्।

# शब्दकोशः ।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलेयम् |
|---|---|---|---|---|
| अङ्कणम् | चत्वरम् | മുറ്റം | ಅಂಗಳ | Court yard |
| अनूदितम् | भाषान्तरीकृतम् | വിവർത്തനം | ಭಾಷಾಂತರಗೊಳಿಸುದು | Translated |
| आराधयन्तः | प्रार्थयन्तः | ആരാധിക്കുന്ന | ಆರಾಧಿಸುವ | Worshipping |
| आम्रम् | आम्रफलम् | മാങ്ങ | ಮಾವಿನಹಣ್ಣು | Mango |
| इक्षुः | रसालः | കരിമ്പ് | ಕಬ್ಬು | Shuger cane |
| कथा | उदन्तम् | കഥാ | ಕಥೆ | Tale |
| केदारः | क्षेत्रम् | വയൽ | ಗದ್ದೆ | Paddy field |
| गृहीतः | स्वीकृतः | സ്വീകരിച്ചത് | ಸ್ವೀಕರಿಸಿದ | Being recieved |
| तण्डुलः | ओदनः | അരി | ಅಕ್ಕಿ | Rice |
| निर्माय | निर्माणं कृत्वा | നിർമിച്ചിട്ട് | ನಿರ್ಮಿಸಿ | Having made |
| प्रतिपादितः | उक्तः | പറഞ്ഞത് | ಹೇಳಿದ | Being told |
| चूतस्तबकम् | चूतगुच्छम् | മാങ്കുല | ಮಾವಿನಹೂ | Bunch of mango flower |
| तप्तोदकम् | तप्तनयनाश्रुः | ചുടുകണ്ണീർ | ದುಃಖದಕಣ್ಣೀರು | Hot eye drop |
| प्रफुल्लं | विकसितम् | വികസിച്ചത് | ವಿಕಾಸಹೊಂದಿದ | Blossamed |
| भञ्जितम् | शिथिलितं | ഒടിക്കപ്പെട്ടത് | ತುಂಡಾದ | Being broken |
| भाषितम् | उक्तम् | പറയപ്പെട്ടത് | ಹೇಳಲ್ಪಟದು | Being spoken |
| मुखाम्भोजम् | मुखकमलम् | താമരപോലുള്ള മുഖം | ತಾವರೆಯಂತಿರುವ ಮುಖ | Face like Lotus |
| यथावश्यम् | आवश्यानुसारम् | ആവശ്യമനുസരിച്ച് | ಆವಶ್ಯಾನುಸಾರ | As per need |
| यामिनीषु | रात्रिषु | രാത്രികളിൽ | ರಾತ್ರಿಗಳಲ್ಲಿ | During nights |
| रुषा | कोपेन | കോപം | ಕೋಪ | By anger |
| वितरीतुम् | दातुम् | നൽകുന്നതിന് | ಕೊಡಲು | To give |
| व्रीहिः | आशुः (पाटलः) | നെല്ല് | ಬತ್ತ | Rice |
| समाहर्तुम् | सम्पादयितुम् | സ്വീകരിക്കുവാൻ | ಸ್ವೀಕರಿಸಲು | To collect |
| सञ्चरन् | विचरन् | സഞ്ചരിക്കുന്നവൻ | ಸಂಚರಿಸುವವನು | Traveller |
| समृद्धिः | ऋद्धिः(विधा) | സമൃദ്ധി | ಸಮೃದ್ಧಿ | Abundance |
| सोपानपङ्क्तिः | आरोहणश्रेणिः | ഏണിപ്പടി | ನಿಚ್ಚಣಿಗೆ | Stair case |
| सौधानि | गृहाणि | വീടുകൾ | ಮನೆಗಳು | Mansions |
| सुमप्रसवे | कुसुमप्रसूते | പൂവിടരൽ | ಹೂಗಳು ಅರಳುವುದ | In the blossoming |

# किमधिगतम् ?

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

## अभ्यासपत्रिका-२

१. **कोष्ठकात् उचितमुत्तरं चित्वा लिखत।**

**क)** **देविश्री** इति पाठभागः कस्मात् ग्रन्थात् स्वीकृतः?

( सिंहभूमिः, बालिद्वीप्, कुरुमुलक्)

**ख)** **माकन्दमञ्जरी** कस्याः कवितायाः अनूदितांशः भवति?

( नलिनी,प्रेमसङ्गीतम्, माम्पषम् )

२. **पट्टिकां पूरयत ।**

| **कविः** | **कृतयः** | **विभागः** |
|---|---|---|
| एस्.के .पोट्टक्काट् | बालिद्वीप् | ——— |
| ——— | माम्पषम् | कविता |
| वाल्मीकिः | ——— | इतिहासकाव्यम्। |

३. **अधोदत्तस्य कवितांशस्य आस्वादनटीकां लिखत।**

भाषणं यथायोग्यं कर्तुमज्ञाताः बालाः।
दीर्घद्रष्टारो यूयं समर्थाः दैवज्ञास्ते।।

४. **उदाहरणानुसारं वाक्यं परिवर्तयत।**

उदा - चूतः पतितः । भवान् स्वीकर्तुं योग्यः ।

चूते पतिते सति भवान् स्वीकर्तुं योग्यः।

**क)** आम्रं च्युतम्। मातुः अक्षिभ्याम् अश्रुः अपतत्।

..........................................................।

**५. सूचनानुसारं विवरणं लिखत।**

केरलस्य राजधानिः ............... पद्मनाभस्वामीमन्दिरम् ...............
मेत्तन्मणि ............... जन्तुशाला ....................पुरावस्तुसंग्रहालयः
.............. शङ्खुमुखम्......... कोवलंसमुद्रतटः।

**६. उदाहरणानुसारं पदच्छेदं कुरुत।**

**उदा -** विवादांश्च - विवादान् + च।

पुरुषांश्च - ________ + _____ ।

**७. उदाहरणानुसारं विग्रहवाक्यं लिखत ।**

**उदा -** बालमाकन्दे - बालश्च असौ माकन्दश्च बालमाकन्दः , तस्मिन्।

सुन्दरपुरुषे - ______________________________।

**८. अधोदत्तवाक्यात् क्त्वान्त ल्यबन्त, तुमुन्नन्तपदानि विविच्य लिखत ।**

सुमेशः नगरं गत्वा मित्रैः सम्मिल्य समुद्रतटं गन्तुं इच्छति।

**९. विवर्तकानां ग्रन्थानां नामानि च यथोचितं योजयत।**

अभिज्ञानशाकुन्तलम् - कुञ्जिक्कुट्टन् तम्पुरान्।
वाल्मीकिरामायणम् - वेण्णिक्कुलं गोपालक्कुरुप्प्।
महाभारतम् - एन्.गोपालप्पिल्ला।
रामचरितमानसम् - वल्लत्तोल् नारायणमेनोन्।
चिन्ताविष्टयाय सीता - केरलवर्मा वलियकोयित्तम्पुरान्।

# ഭാരതത്തിന്റെ ഭരണഘടന

## ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ – താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ്:**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയ സേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സംസ്കാരസമന്വയത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക.

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹ്യനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മിഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപത്കരമായ ജോലികളിൽ നിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽ നിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

ബന്ധപ്പെടേണ്ട വിലാസം:

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**
'ശ്രീ ഗണേഷ്', റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം-34, ഫോൺ: 0471-2326603
ഇ-മെയിൽ: childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ്: www.kescpcr.kerala.gov.in

**ചൈൽഡ് ഹെൽപ്പ്ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ - 1800 425 1400**
**കേരള പോലീസ് ഹെൽപ്പ് ലൈൻ - 0471 - 3243000/44000/45000**

*online* **R.T.E Monitoring:** ***www.nireekshana.org.in***